Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -६९ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि सप्तम्यां मूलानक्षत्रयुक्त शनिवासरः ०८ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

आत्माऽपराधवृक्षस्य फलान्येतानि देहिनाम् ।
दारिद्र्यरोगदुःखानि बन्धनव्यसनानि च ॥

*Poverty, deseases, problems, pains and bandages; these are all fruits of the man's own tree of misdeeds.*

(कौटिल्यस्य नयः-१४)

## मद्यपाननिषेधे नीतीशो विजयते वा?

बिहारराज्ये मद्यपाननिषेधः कृतः। तद्विषये कठिनाः नियमाः विहिताः । पानकर्तैव न, तस्य सम्बन्धिनोऽपि दण्ड्यन्ते तदनुसारेण । किन्तु शासनेन क्रियमाणो निषेधः सफलो भविष्यति किम् इति संशयो वर्तते । मनुराह -

**न मांसभक्षणे दोषो न मद्ये न च मैथुने ।**
**प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥** इति ।

मद्यं पिपासवो येन केन प्रकारेण पिबन्ति । आरोग्यहानिकरं चौर्येण निर्मितं च मद्यं पिबन्ति । अतो मद्यपाननिषेधेन लाभो नास्तीति केचन वदन्ति। स्त्रियस्तु कुटुम्बभारं वोढुं मद्यपाः पतयो न शक्नुवन्तीति हेतोः मद्यनिषेधं स्वागतीकुर्वन्ति । मद्यापणनां निषेधाय स्त्रीभिः आन्दोलनानि च कृतानि । तथापि कस्मिन्नपि देशे मद्यनिषेधः सफलं इत्याहुः । बिहारोच्चन्यायालयश्च मद्यपाननिषेध शासनं नीतिशकृतं न न्याय्यम् इति वदति । सम्प्रति विषयः सर्वोच्च न्यायालयं गतः । तत्र को निर्णयः स्वीकरिष्यते इति न जानीमहे । यदि जनाः स्वयं मद्यपानं वर्जयन्ति तत् सुष्ठु । सर्वकाराः मद्यपानं धनाय उत्तेजयन्ति । तद् दुष्टु । देशो मद्यपिशाचिकामुक्तो भूयादिति वयम् आशास्महे ।

### देवनूरुमहादेवाय प्रशस्तिः

नवदिल्ली-कुप्पल्लिग्रामस्य राष्ट्रकवि कुवेम्पुप्रतिष्ठानेन दीयमाना कुवेम्पु राष्ट्रियप्रशस्तिः प्रस्तुतवर्षे कर्णाटकस्य साहित्यकाराय देवनूरु महादेवाय प्रदास्यते। हिन्दीभाषा-लेखकः गङ्गाप्रसादबिमेलः जवाहर लालनेहरूभारतीयभाषाकेन्द्रस्य अध्यक्षः प्रो. अन्वरपाशः कन्नडाध्ययनपीठस्य मुख्यस्थः प्रो. पुरुषोत्तमबिलिमलेः मध्यप्रदेशस्य अमरकङ्टकस्थस्य इन्दिरागान्धि गिरिजनविश्वविद्यालयस्य कुलपतिः प्रो. टि.वि. कट्टीमनिः च चयन समितौ आसन्। तैः देवनरुमहदेवस्य नाम प्रशस्तये चितम्। अनया प्रशस्त्या सह पञ्चलक्षरूप्यकाणां धनराशिः फलकं च प्रदीयते । राष्ट्रकवेः कुप्पल्लिवेङ्कटप्पपुट्टप्पस्य जन्मदिनोत्सवे डिसम्बरमासस्य एकोनत्रिंशेदिने कुप्पल्लिग्रामे सम्पत्स्यमाने कार्यक्रमे प्रशस्तिः महादेवाय प्रदास्यते। प्रशस्तिस्वी-करणाय महादेवः अङ्ग्यकरोत् इति प्रतिष्ठानस्य अध्यक्षः हं.प.नागराजय्यः तथा कार्यदर्शी कडिदालप्रकाशश्च अवदताम् ।

### उग्राततायिनः सीमान्तः प्रवेष्टुं सन्नद्धाः

नवदिल्ली-पाकिस्तानदेशेन पोषिताः शताधिकाः उग्राततायिनः पाकिस्तानभारतसीमाप्रदेशेषु भारत देशस्यान्तः प्रवेष्टुं सन्नद्धास्तिष्ठन्ति इति आतङ्कदायकविषयं राष्ट्रिय-रक्षणामार्गदर्शकः अजित् दोवल् प्रधानमन्त्रिणं नरेन्द्रमोदिनम् उवाच। गुप्तचरमूलैः संग्रहीतान् विषयान् श्रुत्वा सीमाप्रदेशेषु रक्षणायोधान् रक्षणाय सेनाधिकारिणः समायोजया मासुः। पाकाक्रमितकाश्मीरप्रदेशेषु उग्राणां शिबिराणि भारतीययोधाः समाक्रम्य यथा तान् उग्रान् नाशयामासुः तत्सम्बन्धीनि साक्ष्याणि प्रधानमन्त्रिणः कार्यालयाय समर्पितानि, तत्र उग्राणां गुप्तचरकार्याण्यपि समुद्-धृतानि वर्तन्ते । उरिसेना शिबिराणि उग्राः यथा आक्रमितवन्तः ततः भारीययोधाः सीमान्तः प्रविश्य उग्रान् यथा नाशयमासुः तत्पश्चात् सीमाप्रदेशेषु याः उद्विग्नपरिस्थितयस्सन्ति तान् विषयान् चर्चितुं प्रधानमन्त्री नरेन्द्र मोदी सचिवसम्पुटसभां समायोज्य चर्चितवान्।

## सीमाबन्धः करिष्यते

जैसल्मीर्-पाकिस्थान-भारत-वर्षयोः सीमायां नित्यं जायते महान् क्लेशः। प्रतिदिनं पाकिस्थानं हिंसा वादिनः अन्तः प्रवेश्य भारतदेशे विप्लवं जनयितुं प्रवर्तते । एनाम् ईतिबाधां निवारयितुं सर्वस्यां पाकिस्थानसीमायां कण्टकवृत्तिं निर्मातुं भारतसर्वकारः सङ्कल्पितवान्। केन्द्रगृहमन्त्रिणः श्री राजनाथसिंहस्य नेतृत्वे प्रचलितायां सभायां निर्णयोऽयं कृतः । त्रिसहस्र किलोमीटर्दीर्घा वर्तते सीमा । वृतिनिर्माणाय वर्षद्वयम् अपेक्ष्यते इति ऊह्यते ।

## भवननिर्माता निगृहीता

बेङ्गळूरु-बुधवासरे निपतितस्य भवनस्य अवशेषे द्वौ शवौ दृष्टौ। एवं च तत्र मृतानां संख्या पञ्च । एतत्सम्बन्धे भवनस्य निर्माता श्रीनिवासरेड्डिः आरक्षकैर्निगृहीतः।

धनाशया भवनानां बहुभूमिकानां निर्माणे व्यापारिणः प्रवर्तन्ते । मुग्धेभ्यः तत्रत्यानि गृहाणि ते विक्रीणन्ति च । तावता तेषां कार्यं सम्पन्नम् । धनं लब्धम् । ततो भवनं निपततु वा, जना म्रियन्तां वा, ते न गणयन्ति । प्रस्तुते सन्दर्भे सुदैवात् जनस्तत्र वस्तु नारभन्त । निर्माणावस्थायाम् एव भवनं न्यपतत्। केचन कर्मकरा एव मृताः ।

एतादृशाः वञ्चकाः भवन-निर्मातारः तीव्रं दण्डनीयाः । नियमान् विरुध्यैते भवनं निर्मान्ति । गगनचुम्बि भवनं निर्मीयते । तत्र अग्निज्वाला प्रसरति चेत्, अग्नि-शमनं कर्तुं न कोऽपि शक्नोति । उत्तमसामग्रीं निर्मातारः नोपयुञ्जते । अतो भवनं यदा कदाचिन्निपतति । मृतबन्धूनाम् आक्रन्दनं न कश्चित् शृणोति । अपराधिनस्तावता अदृश्या भवन्ति ये तु अधिकारिणः एतादृशभवननिर्माणम् अनुमन्यन्ते तेऽपि दण्डनीयाः । उत्कोचाय स्पृहयन्तोऽधिकारिणः पापम् आचरन्ति । मुग्धाः कर्मकराः प्राणैः वियुक्ता भवन्ति । न केवलं बेङ्गळूरु नगरे, अपि तु बहुषु नगरेषु एषा स्थितिरिति श्रूयते ।

## वैद्यकीयोपकरणोत्पादनागारस्य स्थापनम्

नवदिल्ली-अत्याधुनिकवैद्यकीयोप-करणानां निर्माणस्य मेड्पार्क्नामक संस्था केन्द्रसर्वकारतः आरभ्यते। एतदर्थं सम्पुटे सदस्यानाम् अनुमोदनमपि प्राप्तमस्ति । चेन्नैनगरे विशालभूमिः चितास्ति । सा भूमिः अधुना सर्वकारायत्तायाः हेच्.एल्. एल्.लैफ्केर्संस्थायाः स्वाम्ये वर्तते। सा संस्था भूमिं प्रदास्यति । चेन्नै-नगरस्य समीपे चेङ्गलपट्नामके प्रदेशे भूमिः वर्तते। ''भारतस्य वैद्यकीयोपकरणोत्पादनक्षेत्रे - इदम्प्रथमतया एतादृशः प्रयत्नः क्रियमाणः वर्तते । अत्याधुनिकोप करणानि न्यूनधनव्ययेन स्थलीय-रीत्या उत्पादनीयानि । अतः मेड्पार्क् अत्र स्थाप्यते। एवमेव जनाः अपि मितव्ययेन चिकित्साम् औषधानि च प्राप्तुम् अर्हन्ति'' इति सर्वकारस्य प्रकटने सूचितमस्ति। 'भारतेदेशे वैद्यकीयोपकरणनिर्माण-क्षेत्रम् अधुनापि शैशवावस्थाया-मेवास्ति । मेड्पार्क्स्थापनेन वैद्यकीयोपकरणतन्त्रक्षेत्रम् अभि-वर्धते। तत्सम्बद्धक्षेत्रेषु उद्योगाः अपि सृज्यन्ते । 'भारते उत्पादयन्तु' इति अभियानस्य उत्तेजनमपि भवति इति सर्वकारः अवोचत् ।

## पाण्डुरङ्गाय दसराकण्ठीरव प्रशस्तिः

मैसूरु-मैसूरुनगरे नवरात्रोत्सवः सवैभवं अस्ति। तदङ्गत्वेन क्रीडा स्पर्धाः अपि आयोजिताः वर्तन्ते । गुरुवारे देवराजारसविविदिद्देश-क्रीडाङ्गणे मल्लयुद्ध प्रचलिता। अखिलभारतस्तरस्य अमुष्यां क्रीडायां अन्तिमस्तरे बेङ्गळूरु - नगरस्य पाण्डुरङ्गशिन्धेः मल्लयुद्धस्य नैकविधशास्त्रोक्तप्रहारान् कृत्वा विजयं प्रापत् अतः 'दसराकण्ठीरवः' इति सः बिरुदाङ्कितः अभूत्। पाण्डुरङ्गः अन्तिमस्पर्धायां बेलगाविनगरस्य अनन्दहडगलिं पराजितवान्।

## सरस्वत्याः पूजा कृता

मैसूरु-अत्रत्यराजवंशस्य सौधे श्रीमान् यदुवीरकृष्णदत्तचामराज-वोडेयर्महाशयः शुक्रवारे यथाविधि सरस्वत्याः पूजां कृतवान् । विप्रोत्तमाः वेदोक्ताशिषः प्रायच्छन् यदुवीराय । तस्य धर्मपत्नी श्रीमती त्रिशिखा च पूजायां भागम् अवहत्। देवी सरस्वती राजदम्पतिभ्यां दीर्घ-मायुरारोग्यं सम्पदभिवृद्धिं पुत्रपौत्राभिवृद्धिं च देयात् ।

## अण्डभक्षणस्पर्धा परित्यक्ता

मैसूरु-शुक्रवारे आयोजिता अण्डभक्षणस्पर्धा परित्यक्ता । मडिकेरीनगरे अण्डभक्षणस्पर्धायां भागं स्वीकृतवान् स्पर्धी अनारोग्येण बाधितः । तस्य स्थितिर्गम्भीरा जाता। अतः स्पर्धा परित्यक्ता इति आयोजका अवदन् ।

## आतङ्कदायिनो विचाराः

नवदिल्ली-राष्ट्रियरक्षणामार्गदर्शकाः सचिवसम्पुटसभायां पाक्पोषिताः उग्राततायिनः भारतान्तः प्रवेष्टुं सन्नद्धाः इति रहस्यविषयान् नरेन्द्र मोदिनं उवाच इति यत् तेन सर्वे जागरूकाः वर्तन्ते । ओतङ्कदायिनो विचारा एते पिओके प्रदेशे उग्राणां शिबिराणि रहसि क्रियाशीलानि सन्ति । तत्र शताधिकाः उग्रात-तायिनः भारतमुपरि आक्रमणानि कर्तुं सुशिक्षिताः सन्नद्धास्तिष्ठन्ति । भारतीययोधैः उग्राततायिनां शिबिराण्युपरि यान्याक्रमणानि कृतानि तत्पश्चात् पाकिस्तानसेनाधि कारिणः उग्राणां रहस्यस्थानानि परितः रक्षणाकार्याणि कल्पितवन्तः। शस्त्रास्त्राणि कथं प्रयोक्तव्यानि सीमाप्रदेशान् अतिक्रम्य अन्तः कथं प्रविशेयुरिति फिदायिन् उग्रेभ्यः प्यारामीडर् शिक्षणानि पाक्सेनाधिकारिणः प्रदयन्तस्सन्ति इति वार्ता समधिगता। भारतान्तःप्रविश्य अत्रस्थान् प्रदेशान् आक्रमितुं सन्नद्धेषु उग्राततायिषु लष्करेतयबा सङ्घटनाया। उग्रा एव अधिकास्सन्ति। तान् समूलं विनाशयेयुरिति अजित् दोवल् प्रधानमन्त्रिणमवोचत् ।